This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(अथ आकाश भैरव कल्पे
प्रत्यंग लिख्यते)

Acc. No:- ~~2356~~ M1023
Title:- शरभ कवच
(आकाश भैरव कल्प)
Subject:- तंत्र
पत्रे :- (19)

K K S U LIBRARY
RAMTEK
441 106
M1023
Dist. Nagpur

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥

॥श्रीगणेशायनमः॥श्रीशिवउवाच॥वक्ष्या
मिशृणुदेवेशीसर्वरक्षणमद्भुतं॥आरभंक
वचंनामचतुर्वर्गफलप्रदं॥१॥आरभशालु
वपक्षिराजाख्यकवचस्यतु॥श्रीसदाशिव
ऋषिश्छंदोबृहतीशारभेश्वरः॥२॥देवताप्र
णवोबीजंप्रकृतिःशक्तिरुच्यते॥कीलकं
पक्षिराजेतिसर्वरक्षाकरोविभुः॥३॥प
रप्रयोगशात्यर्थंवैसिशत्रुनिवृत्तये॥चतु ॥१॥

र्वर्गार्थसिद्ध्यर्थेविनियोगोथभावना॥४॥
रक्ताभंसुप्रसन्नंत्रिनयनममृतोन्मत्तभाषा
शिरामंकारुण्यांभोधिमीशांवरदमभयदंचं
द्ररेखावतंसं॥शंखभालाखिलाशाप्रलिह
तविधिनाभासमानात्मभावंसर्वेशंशालु
वंशंप्रणतभयहरंपक्षिराजंनमामि॥५॥
ॐश्रीशिवःपुरतःपातुमायाधीशस्तुपृष्ठ
तः॥पिनाकीदक्षिणंपातुवामपार्श्वंमहेश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

रः॥६॥शिखांमेंपातुमेशंभुर्ललाटंपातु
शंकरः॥ईश्वरोवदनंपातुभ्रुवौमेध्येपु
रांतकः॥७॥भ्रुवौपातुममस्थाणुःकप
र्दीपातुलोचने॥शिवोमेश्रोत्रयोःपातुवा
गीशःपातुलम्बिकां॥८॥नासयोर्मेवृषा
रूढोनासाग्रंवृषभध्वजः॥स्मरारिःपा
तुमेतालुओष्टयोर्भक्तवत्सलः॥९॥

२

पातुमेमुखंजयोदंतान्चिबुकंपातुभूतरा
ट्परमेशःकपोलौमेत्रिकंपातुकपाल
भृत्॥कंठेपशुपतिःपातुशूलीपातु
हनूमम॥१०॥स्कंधद्वयंहरःपातुधूर्जटिः
पातुमेभुजौ॥भुजसंधिंमहादेवाईश्वरो
मेप्रकुर्परं॥११॥मध्यसंधिंजगन्नाथःग
ष्टंचंद्रशेखरः॥मणिबंधौत्रिनेत्रोमेभीमः

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३

पालुकरःस्तले ॥१२॥ करपृष्ठं मृडः पातुरू
ड्गोंगुष्ठद्वयंमम ॥ उमासहायस्तर्ज्जन्योभ
र्गोमेपातुमध्यमे ॥१३॥ अनामिकेकरा
लास्यःकालकंठःकनिष्ठिके ॥ गंगाध
रोंगुलीपर्वाण्यप्रमेयोनखानिमे ॥१४॥
ईशानःपातुदोर्मूलंमदोमस्वस्तिदोव
तु ॥१४॥ वक्षस्तसुरूषःपातुकुक्षेदृक्षा

३

ध्वरांतक ॥ अघोरोहृदयंपातुवामदेवः
स्तनद्वयं ॥१५॥ भालदृग्जठरंपातुनाभिं
नारायणोव्ययः ॥ कुक्षिप्रज्ञाकरःपातु
कुक्षिपार्श्वेमहाबलः ॥१६॥ सद्योजातः
करौपातुपृष्ठभागंतुभैरवः ॥ मोहनो
जघनंपातुगुदम्मम जितेंद्रियः ॥ ऊ
रेनालिंगदेनोरषणंवृषभध्वजः ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(3)

उरूयुग्मंभव:पालुजानुयुग्मंभवांतक:॥
उँकारंपातुमेजंघेफट्कारोममगुल्फक॥
॥१८॥वौषट्कार:पादपृष्टेवषट्कारोंघ्रिणेस्त
स्वाहाकारोंगुलीपार्श्वेस्वधाकारोंगुली
मम॥१९॥त्वरित्त:सर्वसंधीर्म्मेरोमकूपा
न्नसिंहजित्॥त्वचंपातुमनोवेग:काल
जिद्रुधिरंमम॥२०॥पुष्टिद:पातुमेमांसं

मेदोमेस्वस्तिदोवतु॥सर्वात्मास्थिचयं
पातुमज्जाम्ममजगत्प्रभु:॥२१॥शुक्रंर
द्धिकर:पातुबुद्धिंवाचामधीस्वर:॥मूला
धाराम्बुजंपातुभगवान्द्वारमेस्वर:॥२२॥
स्वाधिष्टानमज:पातुमणिपूरमजप्रिय:॥
अनाहतंरूपालुवेरूणेविशुद्धंजीवनाय
क:॥२३॥सर्वज्ञानप्रदोदेवोललाटंमेस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

दा शिवः॥ ब्रह्मांडं च महादेवः पक्षिराजो रवि
लोल्कलिं॥२४॥ सर्वलोकवशीकारः पातु
मां परगर्वजित्॥ वज्रमुष्टिवराभीतिह
स्तः कालाभ्रसंन्निभः॥२५॥ विजयासहि
तः पातु चैंद्रीं ककुभमग्निजित्॥ शक्तिशू
लकपालासिहस्तः सौदामिनीप्रभः॥२६॥
जयायुतो महाभीमः पातु वैश्वानरीं दिशं॥

५

दंडासिमुशलहलपाशांकुशकरांबुजः॥
॥२७॥ यमांतको जितायुक्तो निशं पातु यमी
दीशं॥ खड्गखेटाग्निपरशुहस्तः शत्रुविम
र्दनः॥२८॥ अपराजितयायुक्तः सदाव्या
न्नैरृतिं दिशं॥ पाशांकुशधनुर्बाणपाणि
र्घोरायुतो ग्रहः॥२९॥ हरिशाभो निशं पा
याद्वारुणीं दिशमात्मजित्॥ ध्वजो ग्रक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

कचोदारभुजोदुर्गायुतः खगः ॥३०॥ चंडवे
गः शिवः पायात्सततंमारुतींदिशं ॥ गदा
क्षस्रग्वराभितिकरांभोजः श्रियायुतः ॥
॥३१॥ कनकाभोमाहातेजाः पातुकौबेर
कींदिशं ॥ त्रिशूलाहिकपालाग्निदोस्त
लोविश्वयायुतः ॥३२॥ भस्मोद्धूलितसर्वा
ङ्गः दैवीपातुपराजितां ॥ जपस्त्रक्पुस्त

६

कांभोजकमंडलुकराम्बुजः ॥३३॥ ऊर्ध्वं
पातुगिरायुक्तः सर्वभूतहितेरतः ॥ शंख
चक्रवराभीतिहस्तपद्मायुतोव्ययः ॥३४॥
नीलांजनसमोनीलः पातालंपात्वनार
तं ॥ अनुक्ता विदिशः पातु शालवो नरसिं
हजित् ॥३५॥ शरभः पातुसंग्रामेयुद्धेवै
रिकुलांतकः ॥ सर्वसौभाग्यदः पातुजाप

(7)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

त्स्वप्नसुषुप्तिषु ॥३६॥ सर्वसंपत्प्रदः पातु ध
नधान्यादिकं मम ॥ संतानदः सुताः पातु
पुत्रानायुः करोवतु ॥३७॥ वधूं वर्द्धिकरः
पातु गृहं मम वशंकरः ॥ ग्रामं ग्रामेश्वरः पा
तु राज्यं पातु दिगंबरः ॥३८॥ राष्ट्रं शांतिक
रः पातु राजानं धर्मशासनः ॥ मार्गं दुष्टरः
पातु धर्मकर्माणि भैरवः ॥३९॥ वटुकः पातु

८

मे सर्वेष्ववस्थासु भयेषु च ॥ स्पर्शावीक्ष
णसंश्लिष्टः प्राणरक्षा मनोजपः ॥४०॥
प्रधानं मूर्त्तिभावश्च प्रसादेषा सु सिद्ध
ये ॥ साधकप्रणवं तारं नमो भगवते
ति च ॥४१॥ प्रतिनाम चतुर्थ्यंतं स्पर्शमि
त्यभिधीयते ॥ द्विज्वलः प्रज्वले साध्यं सा
धयद्दिद्विरक्षतत् ॥४२॥ सर्वभूतेभ्यो हुं

(8)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फ़ट् स्वाहांतं यदीक्षणं ॥ स्कन्दान्पश्यन् जपंस्त्वाप्रतिस्थानं समाहितः ॥ ४३ ॥ प्रार्थयेद् खिलं स्वेष्टं हृदिशा लुवेन्द्वरं ॥ येच संघातकाक्रूराः कपटादौ ष्टिकानराः ॥ ४४ ॥ तस्कराः स्त्रवः क्षुद्रा वधोयुक्ताः पलाच्छिनः ॥ छर्मीचाराबिटोभ्रष्टादिवाचरनिशाचराः ॥ ४५ ॥ तेसर्वेपक्षिराजस्य पक्षवातपराहताः ॥ स्त्रीबालसहिताः ऽ

क्षिप्रं पितृमातृकुलान्विताः ॥ ४६ ॥ भग्नचित्ताहतस्थानायांतुदेन्तांतरस्वयं ॥ येचदुष्टग्रहारक्षः पिशाचादिवयोनयः ॥ ४७ ॥ चतुषष्टिगणाः सप्तसप्तसुन्मतगागग्रहाः ॥ अष्टासीतिमहाभूताः सप्तकोटिमहाग्रहाः ॥ ४८ ॥ नवतिज्वरभेदाश्च नूतभेदाश्चवक्तिकाः ॥ पंचाशद्गण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९

नाथाश्च निपुतं वृत्तिमाग्रहाः ॥४९॥ प्रेता
रूढास्त्रयस्त्रिंशत्सिंहादानपरायणाः ॥ अ
युतं क्षुद्रभेदाश्च लोचे रिंशच्छिवाहयाः ॥
येच मूषकवैडालासूनकोरगराक्षसा ॥५०॥
द्वात्रिंशद्वह्निवक्त्राश्च विंशन्मा जारवक्त्र
चतुषष्ट्या स्वरूपाश्च येचान्ये क्षुद्रयो
नयः ॥५१॥ ते सर्वे शूला लुवेशास्यशांखनि

९

खनमोहिताः ॥ विखिन्नास्खल्लित्तस्वांताः
प्राणत्राणपरायणाः ॥५२॥ गछंतु सप्रयो
क्तारोदेशांतरमनिछया ॥ येच मूषकवैडा
लशुनकोरगवृश्चिकाः ॥५३॥ आशीवि
षाश्शिवाव्यीला व्याघ्रऋक्षभयंकराः ॥
गध्राः श्येनाखगाः काकादंशाकामशा
काः मृगाः ॥५४॥ एते शार महस्ताग्रनखा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

20

त्कर विमोहिताः॥ स्रवद्रक्तघटासिक्ताः शि
लालत्लनिताडिताः॥ ५५॥ संभेदितान
खेच्छोघं न श्येत्वखिलदुश्चराः॥ न दन्तान्
रगाः कापिनातिवातोपि विज्वलं॥ ५६॥
न देहत्वसहोवह्निरायान्तापो न चाधि
कं॥ नवर्षत्वतिवृष्टिश्चनपतत्वशनिं
क्वचित्॥ ५७॥ न कामत्वपमृत्युश्चनृरे

मास्तुत्यातः कदाचन॥ न मारीकालमृत्यु
श्चनूरभेत्वरशासनात्॥ ५८॥ न प्रियं
त्वं भासि जनानभवत्वशुभं क्वचित्॥ न
वदंत्वशुभं वाक्यं जंतवो मम देशके॥
५९॥ मास्तु वैरं तु जन्तूनां मन्यो नं मम रा
जके॥ भवंतु सुखिनः सर्वे सर्वाः संतु
पतिव्रताः॥ ६०॥ सर्वाः सूयंतु सत्पुत्रां
न्पुत्रीश्चशुभलक्षणाः॥ सर्वे सर्वाश्चनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंतु संतु कल्याणकारिणाः ॥ ६१ ॥ राजन्व
तीमही चास्तु राजा भवतु धार्मिकाः ॥ संस
तु वंपयोगावः फलं त्वोषधयो धिकं ॥ ६२ ॥
भवंतु फलदा वृक्षाः सम्यग्भवतु मेखिलं ॥
ममास्तु नरसा नूनमात्मज्ञानमचंचलं ॥
६३ ॥ कामक्रोधमहालोभसंमोमदमत्स ह
राः ॥ मासंतु क्वापि मे सर्वे भगवन्करूणा
निधे ॥ ६४ ॥ देहि मे निश्चलां भक्तिं प्रण ११

नोस्मि पुनः पुनः ॥ गोवल्लभकामारे काल
कूटविषादन ॥ ६५ ॥ मामुद्धरापदंभोधे
स्त्रीपुरघ्नांधकांतकः ॥ कालुवे रूजगंना
थ सर्वभूतहितेरत ॥ ६६ ॥ पाहि मांतर
सा चौरान्दुष्टान्नाशय नाशय ॥ कालभै
रव विघ्नेश विश्वरक्षापरायण ॥ ६७ ॥
रक्षमूषकचौरेभ्यो धान्यराशिमिमं प्रभो ॥
पशिरोज महादेव प्रणतार्तिविनाशन ॥ ६८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२

मदीयानिपदार्थानिनित्यंपालयपालय॥ स
र्वज्ञसर्वलोकेशसर्वदुष्टविनाशक॥ ६९॥ न
स्करेणहृतंवस्त्रंनित्यंदापयदापय॥ येमर्म
घातिनःक्षुद्राःक्षुद्रोपद्रवकारकाः॥ ७०॥ स
र्वाचारपरित्यक्तामानहीनाश्चरोधकाः॥
तेसर्वेशालुवेशस्यमुसलायुधचूर्णिताः॥
७१॥ नश्यंतुनिमिषार्द्धेनपावकाहृततूलव
त्॥ येजनाद्रोहिणोल्पाश्चखलनालोचितभा १२

भाषिणः॥ ७२॥ सत्कर्मविघ्नकर्त्तारोशां
भर्त्सापरायणाः॥ तेशालुवेशहस्ताग्रख
ड्गनिर्भिन्नदेहिनः॥ ७३॥ पतंतुभूतलेयाम्य
प्राणास्तेषांप्रयांत्वरं॥ त्वदंघ्रिध्याननिर्दग्ध
पापकोशायमंत्रिणे॥ मह्यंद्रुह्यंतियेतेषां
विभवानिक्षयंत्वरं॥ त्वदाचारपरंभक्तंसा
धकंमांविवेकिनं॥ ७४॥ येचाक्रमंतिसंग्रा
मेतेगच्छंतुपराहताः॥ त्वदीयेनैवमार्गेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संचरंतं जपातुरं ॥७५॥ येवदंतिपरीपादं भ्रां
ता: शीघ्रं भवंतु ते ॥ त्वद्दासममलंधीरंयेमां
तर्जयंतु बलात् ॥७६॥ मनसाप्यनुमन्यंते
त्वां तं भ्रष्टा तु क्षणात् ॥ मनसा कर्मणा वा
चा ये कुर्वन्त्यपि तु दुसहं ॥७७॥ ते महासोक
रोगार्तौ पतंत्वाशु शिवाज्ञाया ॥ मदीया
पदार्थानि गृह्णीतु ये वलोकंते ॥७८॥ त
त्क्षणादेव नष्टाः सोभवत्वाशु शिवाज्ञया ॥

मदीयं द्रव्यमाहृत्य ये गच्छंती हतस्कराः ॥७९॥
सिंहारिपाशबद्धाश्चस्ते गच्छंतु प्रदक्षिणं ॥ सी
मांतगाश्च ये चौरा गृहीत्वा द्रव्यसंचयं ॥८०॥
अवशावयवास्ते तु आगच्छंतु शिवाज्ञया ॥
तस्करा निम्नगातीस्थांतोः न धान्यधनादि
काः ॥८१॥ पक्षिराजांकुशाकृष्टास्समाग
च्छंतु सानुगाः ॥ चौरागृहीतु मुमुक्ताः समाग
च्छंत मद्गृहे ॥८२॥ समाहृतपदार्थौघाः देशा
तीताश्च तस्कराः ॥ शारभेनाहताकृष्टाः समा

(15)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्वं तु सानुगाः ॥ ८३ ॥ तेनालुवेनापक्षोऽथवा
तेन वयं तु सत्वरं ॥ शांतं विवेकिनं भक्तं त्वदंघ्रि
ध्यानतत्परं ॥ ८४ ॥ ध्रुवं तु यस्सह प्राणास्तेमयां
तु यमीपुरी ॥ षट्त्रिंशत्कोष्ठके यंत्रे रेखाभूत्
लाग्रमध्यगे ॥ ८५ ॥ स्वेच्छामंत्रं लिखित्वा तु ज
पेत्साध्यसाधकः ॥ मुद्रमुखः सहस्रं तु रक्षणा
य जपेन्नित्यं ॥ ८६ ॥ नष्टाहरणके पंचरात्रं प
श्चिमदिङ्मुखः ॥ मारणे सप्तरात्रं तु दक्षिणा
भिमुखो जपेत् ॥ ८७ ॥ रोगनिग्रहणे चाष्टरा

त्रमाग्नेयदिङ्मुखः ॥ इति गुह्यं महायंत्रं पर
मं सिद्धिदायकं ॥ ८८ ॥ शारभेशास्यकवचं
चतुर्वर्गफलप्रदं ॥ प्रत्यह प्रतिपक्षं वा प्रति
मासमथापि वा ॥ ८९ ॥ यो जपेत्प्रतिवर्षं वा
वरेण्यं स शिवो भवेत् ॥ एवं प्रजपतः पुंसः
पातकं चोपपातकं ॥ ९० ॥ तत्सर्वं लयमामो
ति रविणा तिमिरं यथा ॥ दशनादं यो जपेन्नि
त्यं प्रातरुत्थाय साधकः ॥ ९१ ॥ सर्वसिद्धिस
माश्रित्य देहांते नाशिवो भवेत् ॥ त्रिकाले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१४ ध्यानपूर्वंतुजपेद्द्वादशवार्षिकं॥१२॥कायेना
नेनदेवेशि जीवन्मुक्तोभवेत्तुसः॥ज्ञातवा
वारंजपेंनित्यंमंडलैर्योवरानने॥१३॥सो
णिमादिगुणांप्राप्यविचरेत्स्वेच्छयासदा॥पा
तालादिधरण्यादिभुवनानिचतुर्दश॥१४॥
विचरेत्कामतःसर्वैःपूज्यमानोदिवानिशं॥
त्रिमासंयोजपेन्मंत्रमष्टोत्तरसहस्रकं॥
१५॥सहस्रारभैरवस्यसारूप्यंलभते
न्विके॥षण्मासंयोजपेन्नित्यंसंप्रयतस्तुदृढ

१४

व्रतः॥१६॥मद्रूपधारकैर्मंत्रैसहासिद्धिप्रदा
यकैः॥ममलोकेज्ञासंपूज्यो विष्णुलोकेतथै
वच॥१७॥ब्रह्मलोकेचरमतेसर्वत्रननिवा
र्यते॥इंद्राग्नियमयक्षेशराजलेशायवनैस्स
ह॥१८॥सोमेशानकलक्ष्मीशौदिक्पालै
स्सपूज्यते॥आदित्यसोमपृथ्वीजबुधश्री
गुरुभार्गवैः॥१९॥पूज्यतेसग्रहैस्सर्वैःशनि
राहुसकेतुभिः॥ऋतंगिरःपुलस्त्यैश्चपुल

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९६

हात्रिमरीचिभिः ॥१००॥ दक्षकश्यपभृग्वा
द्यैर्योगिभिस्सह पूज्यते ॥ मैरवैर्वसुभी
रुद्रैरादित्यैर्वालखिल्यकैः ॥१०१॥ दिग्ग
जैश्च महानागैर्दिव्यास्त्रैर्दिव्यवाहनैः ॥ म
हिस्वरैर्महारत्नैः कामधेनुसुरद्रुमैः ॥१०२॥
सरिद्भिः सागरैर्द्वीपैर्देवताभिस्तपोधनैः ॥
दानवैराक्षसैः क्रूरैः सिद्धगंधर्वकिन्नरैः ॥
१०३॥ यक्षैर्विद्याधरैर्नागैरप्सरोभिः सपू

१५

ज्यते ॥ अपस्मारग्रहैर्भूमिरुन्मत्तैर्ब्रह्मराक्षसैः
१०४॥ वेतालैः खेचरैर्मंत्रैः कूष्मांडै राक्षसग्र
हैः ॥ ज्वालावक्त्रैस्तमोहारैः स्त्रीग्रहैः पापवि
क्रमैः ॥१०५॥ भूतप्रेतपिशाचाद्यैर्ग्रहैः सर्वै
सपूज्यते ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च
जातिभिः ॥१०६॥ पशुपक्षिमृगव्याघ्रैर्लैः पूज्य
ते सर्वजंतुभिः ॥ किमत्र बहुनोक्तेन तव वक्ष्ये
यथातथं ॥१०७॥ मयाच विष्णुना चैव विस्र

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६ कर्त्ताचपाल्यते॥भवत्याचगिरालक्ष्याब्रह्मो
पयाद्यष्टमातृभिः॥१०८॥गणेश्वरादियोगिं
द्रैयोगिनीभिःसपाल्यते॥यइदंपूजयेद्भक्त्या
नासाध्यंनस्यविद्यते॥१०९॥कवचेंद्रंमहायं
त्रंजपेदस्मादनुत्तमं॥उच्चाटनेमरुद्भक्तोवि
द्वेषेराक्षसाननः॥११०॥प्रागाननोभिवृद्धौ
तुसर्वेषीशाननदिङ्मुखः॥योजपेत्कवचंचं
नित्यंत्रिकालंध्यानपूर्वकं॥१११॥सर्वसि १६

द्धिमवाप्नोतिसहासासाधकोत्तमः॥देव्यु
वाच॥देवदेवमहादेवशिवकारुण्यवारि
धे॥११२॥पाहिमांप्रणतंस्वामिन्प्रसीसे
दैततंमम॥यत्कृत्यंतन्नकृतंयदकृत्यंत
तत्कृत्यवदाचरितंसर्वं॥उभयोःप्रायश्चितं
शिवतवनामाक्षरद्वयोच्चरितं॥११३॥इति
श्रीमदाकाशभैरवकल्पेप्रत्यक्षसिद्धिप्रदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ उमामहेस्वरसंवादे शारभेश्वरकवचंसंपू
र्णमस्तु ॥ श्रीसांबसदाशिवार्पणमस्तु ॥

मदीयंद्रव्यमाहस्वयेगक्षंतीहतस्कराः ॥७९॥
सिंहारिपाशबद्धाश्चस्तेगछंतुप्रदक्षिणं ॥ सी
मांतगाश्चयेचौरागृहीत्वाद्रव्यसंचयं ॥ ८०॥
श्ववशावयवास्तेतुआगछंतुशिवालया ॥
तस्करानिम्नगातीत्ताःस्वांतधान्यधनादि
काः ॥ ८१ ॥ पक्षिसजांकुशाकृष्टास्समागछं
तमद्गृहे ॥ शरभेशाहताकृष्टाः समागछं
तुसानुगाः ॥ ८

KKSU LIBRARY
RAMTEK
441 106
M1023
Dist Nagpur

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 17:28
,TRANSFERRED=2020/10/22 at 17:30:52
,PAGES=19
,TYPE=STD
,NAME=S0004445
,Book Name=M-1023-SHARABH KAVACH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection